# Vishvarupa Sarasvatikritam Krishnanarayana Stotram

# વિશ્વરૂપા સરસ્વતીકૃતં કૃષ્ણનારાયણસ્તોત્રમ્

## Document Information

Text title : Vishvarupa Sarasvatikritam Krishnanarayana Stotram

File name : vishvarUpAsarasvatIkRRitaMkRRiShNanArAyaNastotram.itx

Category : vishhnu, vishnu, lakShmInArAyaNIyasaMhitA, sarasvatI, stotra, krishna

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 4 | adhyAya 45/31-40||

Latest update : May 15, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 15, 2026

*sanskritdocuments.org*

# વિશ્વરૂપા સરસ્વતીકૃતં કૃષ્ણનારાયણસ્તોત્રમ્

તાવત્તત્ર સમાયાતા દિવ્યા ગૌઃ શ્વેતલોહિતા ।
ચતુઃશ‍ૃઙ્ગી ચતુર્વક્ત્રા ચતુષ્પાદા ચતુર્મુખી ॥ ૩૧॥

ચતુર્હસ્તા ચતુર્નેત્રા ચતુર્દંષ્ટ્રા ચતુઃસ્તની ।
નનામ પાદયોસ્તૂર્ણં વ્યોમ્ના ચાગત્ય વૈ પુરઃ ॥ ૩૨॥

કૃષ્ણનારાયણપાદતલે લિલેહ જિહ્વયા ।
હરિર્વારિ દદૌ તસ્યૈ જિહ્વાયાં સા પપૌ દ્રુતમ્ ॥ ૩૩॥

કુમારી સાઽભવત્તત્ર વિશ્વરૂપા સરસ્વતી ।
તુષ્ટાવ પરમાત્માનં શ્રીપતિવલ્લભં નિજમ્ ॥ ૩૪॥

નમોઽનાદિકૃષ્ણકાન્ત રમાકાન્ત ચ તે નમઃ ।
નમઃ શ્રીમાણિકીકાન્ત લક્ષ્મીકાન્ત ચ તે નમઃ ॥ ૩૫॥

નમઃ સરસ્વતીકાન્ત રાધાકાન્ત ચ તે નમઃ ।
સુખદાશ્રીકાન્ત પદ્માવતીકાન્ત ચ તે નમઃ ॥ ૩૬॥

અહં શક્તિર્ભવાન્ શક્તઃ કૃષ્ણાઽહં કૃષ્ણ તે નમઃ ।
અહં ભગવતી ભાર્યા ભગવાઁસ્ત્વં પતિઃ પ્રભુઃ ॥ ૩૭॥

તપસ્તમં સમાયાતા ગોલોકાત્તુ તવાઽઽજ્ઞયા ।
પાવનીં માં સમાજ્ઞાપ્ય સ્થાપયાઽત્ર સરસ્તટે ॥ ૩૮॥

તીર્થં ત્વત્ર હરે કૃષ્ણ મન્નામ્નાઽપિ વિધેહિ ચ ।
તથાઽસ્ત્વિતિ હરિઃ પ્રાહ બદ્રિકે તાં સરસ્વતીમ્ ॥ ૩૯॥

અસ્થાપયત્ સરસ્તીરે મહાધેનું સરસ્વતીમ્ ।
નારાયણસરસ્તીરે તીર્થં સારસ્વતં શુભમ્ ॥ ૪૦॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાઃ તિષ્યસન્તાનાત્મકસ્ય
વિશ્વરૂપા સરસ્વતીકૃતં કૃષ્ણનારાયણસ્તોત્રં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૪। અધ્યાય ૪૫/૩૧-૪૦ ॥

lakShmInArAyaNIyasaMhitA . khaNDa 4. adhyAya 45/31-40..

Proofread by PSA Easwaran

*Vishvarupa Sarasvatikritam Krishnanarayana Stotram*

pdf was typeset on May 15, 2026

Please send corrections to *sanskrit@cheerful.com*